E-ISSN-2584-2870 https://doi.org/10.65833/dbs.2026.311

केन्द्रीयसंस्कृतविश्वविद्यालयः
श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः
देवभूमि-सौरभम्
E-ISSN 2584-2870
Devabhūmisaurabham

Vol 3 Issue 1 Jan-June 2026 Devabhūmisaurabham International Journal of CSU Shri Raghunath Kirti Campus Devprayag Uttarakhand India

# तं वै वैशेषिकं विदुः

**प्रो.महेशझा**
**न्यायवैशेषिक-एवं-दर्शनविभागाध्यक्षः**
**केन्द्रीयसंस्कृतविश्वविद्यालयः**
**श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः**
**दूरभाषसंख्या-9337197315**
**अणुवाक्संख्या- drmaheshjha@gmail.com**

**सुशोभनसिंहमहापात्रः**
**शोधच्छात्रः**
**केन्द्रीय-संस्कृत-विश्वविद्यालयः**
**श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः, उत्तराखण्डः**
**दूरभाषसंख्या- 8101312824**
**अणुवाक्संख्या- susobhansinhamahapatra@gmail.com**

**शोधसारः**

भारतीय-आस्तिकदर्शनेषु वैशिषिकदर्शनं पदार्थतत्त्वनिर्णयप्रधानम्। तत्र महर्षिकणादप्रणीतेऽस्मिन् दर्शने जगतः बहुविधपदार्थानां पारस्परिकः सम्पर्कः तेषामुत्पत्ति-विनाशप्रक्रिया तथा कार्यकारणतत्त्वस्य सूक्ष्मं विश्लेषणं सन्निहितं विद्यते। न्यायदर्शनेन सह अस्य यद्यपि साम्यता विद्यते तथापि अस्य केचन मौलिकाः सिद्धान्ताः सन्ति। यैः इदं दर्शनं दर्शनेभ्यः भिद्यते। प्रस्तुतशोधपत्रे वैशेषिकदर्शनसम्मताः केचन सिद्धान्ताः समालोचिताः विद्यन्ते ये खलु वैशेषिकाणां प्रमुखचिन्तनविषयाः भवन्ति। पत्रस्यास्य प्रारम्भे वैशेषिकदर्शनस्य नामकरणं कथं सञ्जातं तत्र विभिन्न-न्यायवैशेषिकदार्शनिकानां मतानि समुल्लिखितानि विद्यन्ते। तदुत्तरं वैशेषिकदर्शनसम्मतद्वित्वोत्पत्तिप्रक्रिया समालोचिता। यत्र अपेक्षाबुद्ध्या द्वित्वादिसंख्यानामुत्पत्तिः तथा तस्योपलब्धिश्च भवति। ततः पाकजोत्पत्तिप्रक्रियायां वैशेषिकदर्शनसम्मतपाकजोत्पत्तिप्रक्रिया विस्तरेण पर्यालोचिता। पीलुपाकवादे कतिभिः क्षणैः उत्पन्नं द्व्यणुकं रूपादिमद्भवतीत्यत्र वैशेषिकेष्वपि विद्यमानाः मतभेदाः विचारिताः। ततः विभागजविभागप्रक्रिया अपि काणादपरम्परायाः

प्रमुखसिद्धान्तत्वेन विराजते। तत्रापि कारणमात्रविभागात् कथं कारणाकारणविभागः सञ्जायते इति विचारमाश्रित्य चर्चा विहिता विद्यते।

**कूटशब्दाः**

पाकजत्वम्, विशेषगुणोच्छेदः, पर्याप्तिसम्बन्धः, नोदनम्, अवयवः, अवयवी, अनपेक्षत्वम्, रक्ततरत्वं, रक्ततमत्वं, अवच्छेदकः, अवच्छिन्नः, प्रतियोगिता, अनुयोगिता, विभुत्वम्, भूतत्वम्, मूर्तत्वम्।

भूमिका

भारतीयास्तिकदर्शनेषु षट्सु वैशेषिकदर्शनं भवति एकतमं पदार्थतत्त्वनिर्णयप्रधानं दर्शनम्। पदार्थतत्त्वनिर्णयप्रयोजकत्वादस्य दर्शनस्य प्राधान्यम्[1]। दर्शनेऽस्मिन्मुख्यतया षट्पदार्थाः प्रतिपादिताः दृश्यन्ते। यदाह वैशेषिकसूत्रकारः "धर्मविशेषप्रसूतात् द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसम्"[2] इति। त एव गौणतयाऽभावस्यापि अभ्युपगमेन अभावसप्तमाः।

नव्यनैयायिकैरपि संक्षेपतः तदेव मतं स्वीकृत्य प्रवर्त्तितं नव्यन्यायशास्त्रम्। यस्य हि परिभाषाप्रद्योतकतया सुचिरम् अधीयते नव्यन्यायविद्यार्थिभिः सप्तपदार्थोपदेशको भाषापरिच्छेदो नाम। तत्रोक्तं वर्त्तते यत्

द्रव्यं गुणस्तथा कर्म्म सामान्यं सविशेषकम्।

समवायस्तथाऽभावः पदार्थाः सप्त कीर्त्तिताः॥[3]

किन्तु ग्रन्थोऽयं वैशेषिकमतप्रतिपादकः इति वक्तुं नैव युज्यते। यतोहि भाषापरिच्छेदकारेण स्वकारिकायां स्वयमेवोच्यते यत् "एतेषां पाकजत्वं तु क्षितौ नान्यत्र कुत्रचित्"[4] इति। अनेन तु अस्मिन्नेव मते ग्रन्थकर्तुः स्वारस्यं संसूचितम्। तथा तदुत्तरमेव "पाको वैशेषिके नये[5]" इत्यादिवचनेन तु स्वमतभिन्नतया वैशेषिकमतव्यवस्थापनमपि दृश्यते। वस्तुतः साम्प्रतिकनैयायिकानां पदार्थतत्त्वनिर्णये सप्तपदार्थवाद एवावलम्बो न्यायमताविरोधेन सुतरामस्य प्रतिष्ठानात्। तर्कसङ्ग्रहकारादिभिः नैयायिकैः अक्षपादोक्तपदार्थानामत्रैव सप्तसु पदार्थेषु प्रवेशस्य संकीर्त्तनाच्च[6]।

तदिदं वैशेषिकशास्त्रं औलूक्यदर्शनं, काणाददर्शनं, वैशेषिकदर्शनमिति च बहुविधाः संज्ञाः अङ्गीकरोति। अस्य संज्ञाभेदबीजमिदमेव विश्रूयते यत् औलूक्यः अर्थात् उलूकर्षिगोत्रसम्भूतः तत्कृतं दर्शनमौलुक्यदर्शनम्। एतेन तु वैशेषिकदर्शनमतप्रवर्त्तकतया प्रथितस्य कणादापरनाम्नः काश्यपस्य औलुक्य इत्यपि गोत्रकृतं नामान्तरमासीदिति ज्ञायते। वैशेषिकदर्शनमिति संज्ञायाः नानाविधं बीजमनुसन्धीयते दार्शनिकैः। यथा महामहोपाध्यायकालिपदतर्काचार्यः-

"तत्र प्रथमं तावत् विशेषेण अन्त्यलक्षणेन संसृष्टं दर्शनं वैशेषिकदर्शनम् ("अन्यत्र अन्त्येभ्यो विशेषेभ्यः" इति वैशेषिकसूत्रोक्तं विशेषपदार्थप्रतिपादकं सूत्रम्)। तथाहि अन्यत्र दर्शने तथाभूतस्य विशेषपदार्थस्य अनुपदेशात् अत्र च विशेषेण स्वतन्त्रतया तदुपदेशात् एतद्दर्शनस्य दर्शनान्तरव्यावृत्तेः स्फुटतया लाभेन दर्शनान्तरव्यावर्त्तिकेयमस्य संज्ञा"[7]।

"द्वितीयं तावत् एकदेशिनां मते अत्यन्तविशेषगुणोच्छेद एव मोक्षः ("अशेषविशेषगुणध्वंसावधिकदुःखप्रागभावो वा मुक्तिरिति तत्त्वज्ञानान्निःश्रेयस"मित्यन्तसूत्रोपस्कारे शङ्करमिश्रः। "एके तावद्वर्णयन्ति समस्तविशेषगुणोच्छेदे संहारावस्थायामाकाशवदात्मनोऽत्यन्तावस्थानं मोक्ष" इति भासर्व्वज्ञकृतन्यायसारसन्दर्भस्य जयसिंहसूरिकृतन्यायतात्पर्य्यदीपिकायाम्, "एके इति औलुक्याः" इति। एकदेशिनामित्युक्तिश्च बहुत्रैव दुःखात्यन्तोच्छेदस्य वैशेषिकमतसिद्धमुक्तित्वस्य आचार्यादिभिरुपदेशात्।) न तु दुःखात्यन्तोच्छेदः, एत एव मुक्तेः सर्वदर्शनप्रतिपाद्यतया तत्रैव विशेषगुणमादाय दर्शनान्तरवैलक्षण्यस्य उपपादितत्वात् विशेष एव वैशेषिक तत्सम्बन्धितया दर्शनसंज्ञा। विशेषेण विशेषगुणेन संसृष्टमिति वार्थः कर्त्तव्यः"[8]।

"तृतीयं तावत् विगतः शेषः यस्य तत् विशेषं निरवशेषं तदेव वैशेषिकम्। तथाहि षोडशपदार्थवादिप्रभृतिभिः पदार्थानां षोडशसंख्यादिकमुपगम्य ये ये पदार्थाः उपपादिताः सप्तपदार्थमात्रवादिनां वैशेषिकाणामपि प्रस्थानेन ते ते निरवशेषाः सिद्धा, अत एव पदार्थतत्त्वानि निःशेषमधिजिगमिषुणाम् आदितः सप्तपदार्थनामश्रवणमात्रेणैव नोपयुक्तो विरागः, एतेनैव सर्वपदार्थानां निःशेषमुपदेशादिति नाम्नापि स्वदर्शने तत्त्वजिज्ञासुप्रवृत्तिरनुकूलिता"[9]।

"चतुर्थं तावत् विशेषणं विशेषः पदार्थानां लक्षणपरीक्षादिभिः प्रतिपादनम्, स एव वैशेषिकम्, स्वार्थिका अपि शब्दाः कदाचित् स्वलिङ्गवचनानि अतिवर्त्तन्त इति नयेन स्वार्थिकष्णिकप्रत्ययान्तस्यापि लिङ्गपरित्यागो न विरुध्यते। एतेन सांख्यवेदान्तग्रन्थादिषु साक्षात् मुक्त्यनुकूलपदार्थानामेव सविशेषविचारेण सृष्टितत्त्वाद्यालोचनेन च पदार्थतत्त्वेषु तथा सम्यग्दर्शनं न सम्भवतीति तत्प्रयोजनकतया न्यायवैशेषिकादीनामत्यन्तमुपयोगत्वेन तन्त्रकारेणैव सिद्धान्तिततत्वात् तदर्थिकेयं संज्ञा। तत्रापि न्यायदर्शनतत्त्वेस्य लाघवमभिप्रेत्य केवलमेतेनैव विचारितेन पदार्थतत्त्वे सम्यग्दर्शननिष्पत्तिरिति प्रथयितुं नाम्ना तत्प्रतिपादनेन मुमुक्षुप्रभृतीनां साम्मुख्यमुपपादितं भवतीति ध्येयम्"[10]।

"पञ्चमं तावत् विशेषो भेदः विशेषो विशेषगुणश्च ताभ्यां संसृष्टं दर्शनं वैशेषिकम्। तथाहि वेदान्तदर्शने आत्मनो भेदो नाभ्युपेयते विशेषगुणश्च। अत्र दर्शने आत्मनां भेदः, तद्वृत्तिविशेषगुणाश्च अभ्युपेयन्ते। कापिलैः आत्मभेदमङ्गीकुर्वाणैरपि नात्मनो विशेषगुणवत्त्वम्। अत एव अनया संज्ञया स्वदर्शनस्य आत्मभेदपरत्वं आत्मसगुणत्वपरत्वञ्चेति द्वयं प्रतिपादयद्भिः कणादमहर्षिभिः सांख्यवेदान्तादिभिरस्य गतार्थत्वं नास्तीति प्रतिपाद्यते"[11]।

तादृशवैशेषिकसम्मतविशिष्टसिद्धान्तप्रतिपादिका काचित् कारिका सर्वदर्शनसङ्ग्रहग्रन्थे समुपलभ्यते। यथा

"द्वित्त्वे च पाकजोत्पत्तौ विभागे च विभागजे।

यस्य न स्खलिता बुद्धिस्तं वै वैशेषिकं विदुः॥[12]"

अत्र कारिकायामुल्लिखितसिद्धान्ताः वैशेषिकाणां स्वाधीनाः विशिष्टाश्च। एताननतिरिच्य यद्यपि अनेके विशिष्टाः सिद्धान्ताः विद्यन्ते तथापि एते सिद्धान्ताः परममुख्याः सन्तीत्यतः एतेषामेव पर्यालोचनमत्र सारल्येन विधीयते।

**द्वित्वोत्पत्तिप्रक्रिया**

वैशेषिकदार्शनिकानां विशिष्टसिद्धान्तेषु द्वित्वसङ्ख्योत्पत्तिविषयकः सिद्धान्तः प्रमुखः विद्यते। "एकादिव्यवहारहेतुः सङ्ख्या[13]" इति वैशेषिकाभिमतं सङ्ख्यायाः स्वरूपम्। सा सङ्ख्या तु एकद्रव्या अनेकद्रव्या चेति। एकद्रव्या सङ्ख्या तु कारणगुणपूर्विका भवतीति सिद्धान्तः। यदाह प्रशस्तपादाचार्यः- "अपाकजरूपरसगन्धस्पर्शपरिमाणैकत्वैकपृथक्त्वगुरुत्वद्रवत्वस्नेहवेगाः कारणगुणपूर्वकाः[14]"। किन्तु द्वित्वादिसङ्ख्याः नैव कारणगुणपूर्वकाः भवन्ति। तदर्थमेव तेषां प्रतीतिः सर्वदा नैव भवति। तेषामुत्पत्तिस्तु अपेक्षाबुद्धितः भवतीति वैशेषिकानामाशयः यदाह प्रशस्तपादाचार्यः "परत्वापरत्वद्वित्वपृथक्त्वादयः बुद्ध्यपेक्षाः[15]" अर्थात् द्वित्वादिकाः सङ्ख्यास्तु अपेक्षाबुद्धिजन्याः, यदुक्तं भाषापरिच्छेदकारेणापि

"द्वित्वादयः परार्धान्ता अपेक्षाबुद्धिजा मताः[16]"

द्वित्वसङ्ख्यायाः उत्पत्तिं प्रति द्रव्यद्वयं भवति समवायिकारणं यतोहि समवायेन द्रव्यद्वयमाश्रित्यैव द्वित्वसंख्या जायते, तथा तादृशद्रव्यद्वयस्थम्-एकत्वम् अर्थात् प्रत्येकद्रव्यगतमेकत्वं तादृशद्वित्वोत्पत्तौ असमवायिकारणम् एवं तादृशद्रव्यद्वयनिष्ठ-एकत्वयोः ज्ञानं भवति निमित्तकारणम्। इदमेव एकत्वज्ञानं अपेक्षाबुद्धिपदाभिधेयम्। एतानि कारणानि तथा अदृष्टादिसाधारणकारणानि मिलित्वा द्वित्वादिसङ्ख्याः जनयन्ति। द्वित्वस्य गुणत्वात् स्वाश्रयीभूते द्रव्ये द्वित्वसङ्ख्या यद्यपि समवायेन तिष्ठति तथापि प्रत्येकस्मिन् आश्रये अयं द्वाविति व्यवहारः नैव भवतीत्याशयेनैव मुक्तावल्यां विश्वनाथः कथयति यत् "द्वित्वादयस्तु व्यासज्यवृत्तिसङ्ख्या..[17]"। तदर्थमेव "अयं न द्वौ किन्तु द्वित्ववानि"त्याकारिका प्रतीतिरपि जायते। तादृशप्रतीतिनिर्वाहार्थं नव्याः पर्याप्तिनामकः किञ्चन सम्बन्धविशेषमभ्युपगच्छन्ति। यदाह विश्वनाथन्यायपञ्चाननः "यद्यपि द्वित्वादिसम्बन्धः प्रत्येकं घटादावपि वर्त्तते, तथापि एको द्वाविति प्रत्ययाभावात् एको न द्वाविति प्रत्ययसद्भावात् द्वित्वादीनां पर्याप्तिलक्षणः कश्चित् सम्बन्धोऽनेकाश्रयोऽभ्युपेयते[18]" इति। तस्मात् द्वित्वादिसंख्याः पर्याप्तिसम्बन्धेन यावदधिकरणं व्याप्य जायन्ते इति स्वीकरणीयमेव।

तथाविधद्वित्वादिसंख्यायाः उत्पत्तिविनाशक्रमं वैशेषिकाः इत्थं प्रतिपादयन्ति यत् प्रथमे क्षणे द्रव्याभ्यां सह इद्रियार्थसन्निकर्षः जायते। अत्र इन्द्रियार्थसन्निकर्षः न केवलं द्रव्याभ्यां सहैव किन्तु प्रत्येकगत-एकत्वसंख्याभ्यां सह तथा तद्गत-एकत्वत्वजात्या सहापि सम्बन्धः सञ्जायते। प्रथमसन्निकर्षः रामश्यामाभ्यां सह चक्षुसंयोगात्मकः, द्वितीयः भवति एकत्वसंख्यया सह इन्द्रियसंयुक्तसमवायरूपः तथा तृतीयः भवति एकत्वत्वजात्या सह चक्षुसंयुक्तसमवेतसमवायस्वरूपः। एते त्रितयसन्निकर्षाः प्रशस्तपादेन "यदा बुद्धश्चक्षुषा समानासमानजातीययोर्द्रव्ययोः सन्निकर्षे सति तत्सयुक्तसमवेतसमवेतैकत्वसामान्यज्ञानोत्पत्तावेकत्वसामान्यतत्सम्बन्धज्ञानेभ्य एकगुणयोरनेकविषयिण्येका बुद्धिरुत्पद्यते तदा तामपेक्ष्यैकत्वाभ्यां त्वाश्रययोर्द्वित्वमारभ्यते[19]" इत्यादिवाक्येन समुल्लिखिताः विद्यन्ते।

चक्षुरिव त्वगिन्द्रियस्यापि एतादृशाः सन्निकर्षाः सम्भवन्ति चक्षुरिव त्वचापि संख्यायाः गृह्यमाणत्वात्। ततः द्वितीये क्षणे द्वित्वोत्पत्तिः। तृतीये क्षणे द्वित्वद्वित्वत्वे इत्याकारकद्वित्वस्य निर्विकल्पकप्रत्यक्षरूपविशेषणज्ञानं ततश्च चतुर्थक्षणे द्वित्वमित्याकारकं द्वित्वविशेष्यकं द्वित्वत्वप्रकारकं सविकल्पकं ज्ञानम् अपेक्षाबुद्धेः नाशश्च जायते। तदुत्तरं पञ्चमे क्षणे द्वित्वसंख्यायाः नाशः। यद्यपि "योग्यविभुविशेषगुणानां स्वोत्तरवृत्तिविशेषगुणनाश्यत्वात्[20]" इति नियमेन ज्ञानेच्छादियोग्यविभुविशेषगुणाः स्वोत्तरोत्पन्नगुणनाश्याः भवन्ति। तदर्थं द्वित्वस्य निर्विकल्पकप्रत्यक्षसमये अपेक्षाबुद्धेः नाशः अङ्गीकार्यः तथापि प्रकृते तु अपेक्षाबुद्धेः त्रिक्षणावस्थायित्वमवश्यमभ्युपगन्तव्यं नोचेत् प्रथमे क्षणे अपेक्षाबुद्धिः, द्वितीये क्षणे द्वित्वोत्पत्तिः, तृतीये च द्वित्वस्य निर्विकल्पकप्रत्यक्षं जायते। तस्मिन्नेव तृतीये क्षणे अपेक्षाबुद्धिः नश्यति चेत् तदुत्तरक्षणे द्वित्वस्य नाशः अङ्गीकार्यः। तेन च द्वित्वस्य सविकल्पकं प्रत्यक्षं न सम्भवति तदेव विचिन्त्य मुक्तावलीकारः कथयति " अन्यथा निर्विकल्पककालेऽपेक्षाबुद्धेर्नाशात् द्वत्वस्यैव नाशः स्यात्, न तु द्वित्वप्रत्यक्षम्, तदानीं विषयाभावात्। विद्यमानस्यैव चक्षुरादिना ज्ञानजननोपगमात्[21]"

एवं प्रकारेण द्वित्वस्य उत्पत्तिः विनाशः तथा द्वित्वप्रत्यक्षस्य उत्पत्तिः विनाशश्च जायते। वस्तुतः अपेक्षाबुद्ध्या द्वित्वसङ्ख्यायाः उत्पत्तिः अपेक्षाबुद्धिनाशाच्च द्वित्वस्य नाशः इति स्थूलतः अवधेयम्। अत्र इदमपि बोध्यं यत् द्वित्वसंख्या अपेक्षाबुद्धेः नाशात् विनश्यति। कदाचित् द्वित्वाश्रयद्रव्यनाशात् द्वित्वस्य नाशः अङ्गीक्रियते।

**द्वित्वनाशस्य कारणनिरूपणम्**

प्रथमे क्षणे एकत्वसामान्यज्ञानं तथा एकत्वाश्रयीभूतघटस्य अवयवे कपाले क्रिया उत्पद्यते। द्वितीयक्षणे अपेक्षाबुद्धिः तथा तादृशक्रियावतः कपालात् कपालान्तरस्य विभागः। तृतीये द्वित्वस्य उत्पत्तिः एवं कपालद्वयसंयोगस्य नाशः जायते। चतुर्थक्षणे द्वित्वस्य सामान्यज्ञानं तथा घटस्य नाशः जायते। पञ्चमे क्षणे अपेक्षाबुद्धेः नाशः द्वित्वस्य नाशश्च सञ्जायते। अत्रोल्लिखितं द्वित्वनाशं प्रति तु अपेक्षाबुद्धेः कारणता नास्ति कार्यकारणयोः पौर्वापर्याघटितत्वात्। अपेक्षाबुद्धेः यदि पूर्वक्षणे नाशः, तदुत्तरक्षणे च द्वित्वस्य नाशः यदि भविता तदा तु तयोः कार्यकारणभावः अङ्गीकर्तुं शक्यते। तदर्थमत्र तु द्वित्वस्य नाशं प्रति तदाश्रयीभूतघटनाशस्यैव कारणता स्वीकर्तव्या। अपेक्षाबुद्धेः नाशात् द्वित्वस्य नाशः पूर्वमेव चर्चितः।

इत्थमपि कल्प्यते यत् यत्र अपेक्षाबुद्धेः नाशः द्वित्वाश्रयद्रव्यस्य नाशश्च एतदुभयोः अन्यतरं द्वित्वनाशं प्रति कारणं कथयितुं न शक्यते। अपि तु उभयोरेव कारणत्वमभ्युपगन्तव्यम्। यदि अपेक्षाबुद्धेः उत्पत्तिक्षणे एकत्वाश्रयीभूते घटावयवे क्रिया स्वीक्रियते तदा तु द्वितीयक्षणे अपेक्षाबुद्ध्या द्वित्वस्योत्पत्तिः कपालक्रियाजन्यः कपालद्वयविभागश्च जायते। तृतीयक्षणे द्वित्वस्य सामान्यज्ञानं तथा तादृशकपालद्वयविभागात् कपालद्वयसंयोगनाशः जायते। चतुर्थक्षणे पूर्वक्षणोत्पन्नद्वित्वसामान्यज्ञानेन अपेक्षाबुद्धेः नाशः कपालद्वयसंयोगनाशात् घटस्य नाशश्च ततः पञ्चमक्षणे द्वित्वस्य नाशः। अत्र तु चतुर्थक्षणे द्वित्वनाशस्य उभयमपि कारणं विद्यते। केनचिदेकेनैव द्वित्वस्य नाशः जायते इति यद्युच्यते तदपि न समीचीनम्। यतोहि एकस्य कारणत्वकथने अपरस्य कारणत्वाकथने विनिगमनाविरहोऽपि विद्यते। एककार्यसम्पादकं द्विविधकारणं समकाले तिष्ठति चेत् विनिगमनां विना कस्यचित् कारणत्वं न

स्वीकार्यम्। तदर्थमेव चतुर्थक्षणोत्पन्न-अपेक्षाबुद्धिनाशघटनाशयोः कारणत्वं वाच्यम्। तस्मात् अपेक्षाबुद्धेः नाशात् द्वित्वनाशः, द्वित्वाश्रयद्रव्यनाशात् द्वित्वनाशः तथा एतदुभयोः नाशात् द्वित्वस्य नाशः जायते।

इदमपि वक्तुं शक्यते यत् अपेक्षाबुद्ध्यादिनां नाशादपि द्वित्वस्य नाशः न भवति। तदा तु द्वित्वनाशं प्रति अतिरिक्तं कारणं कल्पनीयम्। केचन न्यायवैशेषिकाचार्याः तु ईश्वरस्य अपेक्षाबुद्धिं स्वीकुर्वन्ति। तेन परमाणुद्वये द्वित्वस्योत्पत्तिमपि स्वीकुर्वन्ति। ईश्वरीय-अपेक्षाबुद्ध्या परमाणुद्वये यद्द्वित्वमुत्पद्यते तस्य नाशः नहि आश्रयनाशात् अपेक्षाबुद्धिनाशाद्वा जायते। यतोहि ईश्वरीयबुद्धिस्तु नित्या एव। तथा परमाणुः अपि नित्यद्रव्यम्। तस्मात् एतदुभयोः अन्यतरस्य वा नाशः न सम्भवति। किन्तु ईश्वरीयापेक्षाबुद्धिजन्यं द्वित्वमनित्यमेव। तस्य जन्यभावपदार्थत्वात्। तस्मात् इदं द्वित्वं फलनाश्यं भवति। अर्थात् तेन द्वित्वेन यत् फलमुत्पद्यते तेनैव फलेन तस्य विनाशः जायते इति कल्पनीयम्। यतोहि कार्योत्पत्तेः अनन्तरं कारणस्य अन्यत् किमपि फलं नावशिष्यते तस्मात् फलेनैव तस्य नाशः अभ्युपगन्तव्यः। परमाणुद्वये यद्द्वित्वं जायते तस्य कार्यं भवति द्व्यणुकगत-अणुपरिमाणस्योत्पादनम्। तदुत्पत्त्यनन्तरं द्वित्वसंख्यायाः नास्ति किमपि प्रयोजनम्। तस्मात् द्व्यणुकगत-अणुपरिमाणेनैव तस्य विनाशस्वीकारे न कश्चिद्दोषः।

## पाकजोत्पत्तिप्रक्रिया

पच्यतेऽनेन इति व्युत्पत्या पाकशब्देन रूपरसगन्धस्पर्शपरावृत्तिजनकविजातीयतेजस्संयोगः पाकपदेनाभिधीयते। एष पाकः न्यायवैशेषिकयोर्मते सुप्रसिद्धः। उक्तञ्च महर्षिणा कणादेन स्ववैशेषिकसूत्रे -"कारणगुणपूर्वकाः पृथिव्यां पाकजाः[22]"। न्यायशास्त्रप्रणेत्रा महर्षिणा गौतमेनापि सांख्याभिमतपरिणामवादं निराकुर्वता "न पाकगुणान्तरोत्पत्तेः[23]" इति न्यायसूत्रेण पाको व्यवस्थापितः। पाकाज्जायते इति पाकजम्। तच्च पार्थिवरूपरसगन्धादिकम्। इममेवाशयमभिमत्य अन्नंभट्टेनोक्तं "रूपादिचतुष्टयं पृथिव्यां पाकजमनित्यञ्चेति[24]"। एवञ्च पार्थिवरूपरसादिकं विजातीयेनाग्निसंयोगेन परिणमते। जलीयरूपरसादिकस्य तु नहि पाकेन परिणामः। नहि शतधाध्मायमानेऽपि जले रूपादीनां परिवर्त्तनं दृश्यते। जले यत्सौरभस्योपलब्धिर्दृश्यते अथवा औष्ण्यस्योपलब्धिः सा जलतेजःसंयोगाभ्यामेव जायते इति सर्वजनानुभवसिद्धम्। जलादीनां रूपरसादयस्तु कारणगुणपूर्वकाः एव भवन्ति। नहि तत्र कार्यगतरूपरसादिकमग्न्यादिसंयोगात् परावर्त्तते। अतो नहि जलादिगतरूपादीनां पाकजत्वं प्रतिपादयितुं शक्यते। पार्थिवन्तु रूपरसादिकं प्रथमं कारणगुणपूर्वकमपि पश्चाद्विजातीयतेजःसंयोगरूपेण विपरिणमते। स च पाकः विजातीयरूपजनकात् रसजनकः विजातीय एव भवति। एवमेव स्पर्शादिजनकात् गन्धजनकः विजातीयतेजःसंयोगरूपः पाकः विलक्षण एव। यतोहि तृणपुञ्जनिक्षिप्त-आम्रादिफले क्वचित्स्थले रूपपरिवर्तनं दृश्यते। परन्तु रसादेः परिवर्तनं नोपलभ्यते। क्वचित्स्थले च कदल्यादौ रसपरिवर्तने जातेऽपि रूपस्य परिवर्तनं न भवति। इत्थमनुभवस्य सर्वजनसिद्धत्वात् रूपरसादिजनकाः पाकाः विलक्षणाः एव स्वीकार्याः। एतत्पाकस्य माहात्म्येनैव एकैव पार्थिवावयवानामपि भिन्न-भिन्नरूपेण पदार्थत्वस्यानुभूयमानत्वात्।

वैशेषिकाभिमताः द्वित्वोत्पत्ति-पाकजोत्पत्ति-विभागजविभागप्रक्रियाः अतीव दुष्कराः विद्यन्ते। तत्रेदानीं पीलुपाकवादः विविच्यते। उपर्युक्तविविधासु प्रक्रियासु या पाकजप्रक्रिया वैशेषिकाणां साऽत्र विविच्यते इत्यर्थः।

वैशेषिकाः पीलुपाकवादिनः, पीलवः परमाणवो भवन्ति। तत्रैव पाकः जायते न तु अवयविनि पाको भवति। तेषामयमाशयः घटादिषु अन्तः तेजःसंयोगाभावे घटादेरन्तःस्थितेषु परमाणुषु न हि पाकः सम्भवति। अतः तेजसः प्रवेशः तत्रावश्यकः। इत्थं पाकार्थं निक्षिप्तस्य घटस्य तीव्रतीव्रया वेगवत्या च वह्निज्वालया नोदनाख्यसंयोगात् घटारम्भकेषु परमाणुषु कर्म समुत्पद्यते। तया क्रियया अवयवानां परस्परं विभागो जायते। विभागाच्च घटारम्भककपालद्वयसंयोगनाशः, ततः असमवायिकारणनाशात् घटनाशः। तदित्थं सर्वे अवयवाः परमाणुरूपेण स्थिताः भवन्ति, तदनन्तरं स्वतन्त्रेषु परमाणुषु पूर्वरूपनाशपूर्वक-उत्तररूपस्योत्पत्तिर्जायते। यथोक्तं भाष्यकारेण प्रशस्तपादाचार्येण-"घटादेरामद्रव्यस्याग्निना सम्बद्धस्याग्न्यभिघातान्नोदनाद्वा तदारम्भकेष्वणुषु कर्माण्युत्पद्यन्ते, तेभ्यो विभागाः, विभागेभ्यः संयोगविनाशाः, संयोगविनाशेभ्यश्च कार्यद्रव्यं विनश्यति। तस्मिन् विनष्टे स्वतन्त्रेषु परमाणुष्वग्निसंयोगाद्यौष्ण्यापेक्षाच्छ्यामादीनां विनाशः पुनरन्यस्मादग्निसंयोगादौष्ण्यापेक्षात्पाकजा जायन्ते। तदनन्तरं भोगिनामदृष्टापेक्षादात्माणुसंयोगादुत्पन्नपाकजेष्वणुकर्मोत्पत्तौ एषां परस्परसंयोगात् द्वणुकादिक्रमेण कार्यद्रव्यमुत्पद्यते। तत्र च कारणगुणप्रक्रमेण रूपाद्युत्पत्तिः। न च कार्यद्रव्य एव रूपाद्युत्पत्तिर्विनाशो वा सम्भवति। सर्वावयवेष्वन्तर्बहिश्च वर्त्तमानस्याग्निना व्याप्त्यभावादणुप्रवेशादपि च व्याप्तिर्न सम्भवति कार्यद्रव्यविनाशादिति[25]"।

वैशेषिकाणां मते अवयविविनष्टेष्ववयवेषु कथमपि पाको न सम्भवति अपि तु वह्निसंयोगेन अवयविविनष्टेषु स्वतन्त्रेषु परमाणुष्वेव पाको जायते। अत्रेयं शंका जायते यत् अवयविनाऽवष्टब्धेऽवयवे एव रूपान्तरस्योत्पत्तिः कुतो न भवति? अवयवियुक्तेऽवयवे रूपान्तरोत्पत्तौ किं बाधकम्? कारणसत्त्वे यदि कश्चन प्रतिबन्धको न भवति तदा कार्योत्पत्तेः सर्वजनानुभवसिद्धत्वादित्याशंकायां काणादमतावलम्बिभिः इत्थं समाधीयते- स्वकारणीभूतसंयोगाश्रयतासम्बन्धेन अवयव्यधिकरणेष्ववयवेषु कथमपि पाकः भवितुं नार्हति। यतोहि अवच्छेदकतासम्बन्धेन स्पर्शवद्द्रव्यसंयोगं प्रति अवच्छेदकतासम्बन्धेन स्पर्शवत्संयोगः प्रतिबन्धकः। प्रकृते स्पर्शवद्द्रव्यसंयोगः घटतेजःसंयोगः, तं प्रति अवच्छेदकतासम्बन्धेन घटकारणीभूतावयवसंयोगः स्पर्शवत्संयोगः। सोऽपि अवच्छेदकतासम्बन्धेन घटे विद्यते। अतः अवच्छेदकतासम्बन्धेन तत्र रूपान्तरस्योत्पत्तिः नहि सम्भवति। अवयवनिष्ठस्पर्शवत्संयोगस्य अवयविनि रूपाद्युत्पत्तौ प्रतिबन्धतत्वात्। एवञ्च घटारम्भकावयवसंयोगस्य विद्यमानत्वे पाकात्मकरूपान्तरोत्पादकतेजःसंयोगः भवितुं नार्हति। तदभावाच्च तज्जन्यरूपादेरुत्पत्तिरपि न सम्भवति। इत्थं वैशेषिकमते प्रथममग्निसंयोगाधीनः अवयविनाशः ततोऽवशिष्टेष्वारम्भकसंयोगाभावविशिष्टेष्ववयवेषु पाकः, ततोऽवयवे एव पूर्वरूपनाशपूर्वकरूपान्तरमुत्पद्यते। तदनन्तरं पुनः पक्वानां परमाणुनां संयोगात् द्व्यणुकादिक्रमेण महत्पृथिव्याद्यात्मकमवयवी समुत्पद्यते। तदित्थं श्यामादिघटात् भिन्न एव रक्तघटः। तेजसामतिशयितवेगवशात्पूर्वघटनाशः घटान्तरोत्पत्तिश्च भवतः। तेजसामतिशयितवेगवशादेव पूर्वघटनाशः उत्तरघटोत्पत्तिश्च न प्रत्यक्षे भवतः।

न च तादृशस्थले यदि पूर्वश्यामघटादुत्तरत्र जायमानः रक्तघटः भिन्नः अस्ति तदा कथं सोऽयं घटः इति प्रत्यभिज्ञा तत्र जायते। एतद्विषये इत्थं वक्तव्यं यत् "सोऽयं घटः" इत्याकारिका प्रतीतिः "सेऽयं दीपमालिका" इतिवत् सादृश्यनिमित्तिकैव इति। अत्र द्व्यणुकादिक्रमेण इत्यस्य परमाणुद्वयसंयोगात् द्व्यणुकोत्पत्तिः, द्व्यणुकत्रयसंयोगात् त्रसरेणोत्पत्तिः, त्र्यणुकचतुष्टयसंयोगाच्चतुरणुकोत्पत्तिरित्यादिक्रमो ग्राह्यः। परमाणुत्रयादिसंयोगस्य नहि कार्योत्पादकत्वं ते स्वीकुर्वन्ति। अतएव परमाणुद्वयादित एव द्व्यणुकादिक्रमेणोत्पत्तिर्भवतीत्यत्र

प्रमाणत्वेन श्रीधरविरचितकन्दलीटीकाभिमतमवलोकनीयम्। तद्यथा स चैकोऽनारम्भकः एकस्य नित्यस्य यद्यारम्भकत्वं स्यात्तदा तस्य त्रिकाले विद्यमानतया सर्वदैव सर्वस्यापि कार्यस्योत्पत्तिप्रसङ्गः। अपेक्षणीयस्य कस्यचन वस्तुनः अनावश्यकत्वादविनाशित्वाच्च। आश्रयविनाशश्च अवयवविभागस्य नाशकारणीभूतस्य तत्राभावात्। एवं त्रयाणामपि परमाणूनामारम्भकत्वं नहि सम्भवति। यतोहि महतः कार्यद्रव्यस्य जनने स्वपरिमाणापेक्षया स्वल्पतरपरिमाणवतः कार्यद्रव्यस्यैव सामर्थ्यं दृश्यते अतः त्र्यणुकं कार्यद्रव्येणैव जायते, महत्परिमाणवत्त्वात् घटादिवत्। एवं त्रयाणां परमाणूनाम् एकस्य चारम्भकत्वं यदि अभ्युपेयते तदा त्रसरेणोः कार्यद्रव्यजन्यत्वनियमात् परमाणुत्रयेण तदुत्पत्तिर्न स्यात् इति रीत्या एकस्य परमाणोः परमाणुत्रयस्य च कार्यजनकत्वं खण्डितम्। एवञ्च द्वाभ्यामेव परमाणुभ्यां यद्द्रव्यमुत्पद्यते तत्द्व्यणुकसंज्ञकं भवति। बहुभिरेव द्व्यणुकैः त्रसरेणुः उत्पद्यते, न तु द्वाभ्यां त्रसरेणोत्पत्तिः। अतः न द्व्यणुकद्वयेन न वा परमाणुत्रयेण त्रसरेणोत्पत्तिः। एवमेव कदाचित् त्रिभिः आरभ्यते त्रणुकमित्युच्यते कदाचिच्चतुर्भिः आरभ्यते कदाचित्पञ्चभिः आरभ्यते इत्येवं वक्तुं शक्यते। कारणसंख्याबाहुल्येन महत्परिमाणतारतम्यं तत्र जायते।

इत्थं तत्तत्कार्यस्य स्वसमवायिकारणीभूतेन अवयवेनैव उत्पत्तेः विवक्षिततया न केवलं द्व्यणुकबाहुल्येन घटादेः उत्पत्तिः शङ्कयितुं शक्यते। यतोहि कार्यभूतघटात्मकद्रव्यस्य समवायिकारणं कपालमेव तत्संयोगश्च घटं प्रति असमवायिकारणं भवति। अतः घटं प्रति कपालस्य समवायिकारणता कपालसंयोगस्य च असमवायिकारणता, ताभ्यामेव घटोत्पत्तिः। अत एव केवलं बहुसंख्यकेन द्व्यणुकेन नहि घटपटाद्युत्पत्तिः। तथा सति कपालमनभ्युपेत्य द्व्यणुकस्यैव समवायिकारणत्वं तत्संयोगानामसमवायिकारणत्वं प्रकल्प्य घटोत्पत्तेः विचारासहत्वात् अपि तु परमाणुभ्यां द्व्यणुकं द्व्यणुकेभ्यः त्रसरेणुः, त्रसरेणुभ्यः चतुरणुकादिक्रमेण घटोत्पत्तिरभ्युपेया।

मतेऽस्मिन् अग्निसंयोगात् परमाणौ क्रिया उत्पद्यते, क्रियया च विभागः, विभागादारम्भकसंयोगनाशः, आरम्भकसंयोगनाशात् द्व्यणुकनाशः, तदनन्तरं श्यामरूपनाशः, ततः द्रव्यारम्भानुगुणा क्रिया समुत्पद्यते। तदनन्तरं परमाणोः आकाशदेशात् विभागः, अनारम्भकसंयोगनाशः, ततः परमाणौ रक्तोत्पत्तिः, तदनन्तरं रक्तद्व्यणुकादिक्रमेण रक्तघटोत्पत्तिः जायते। इत्येवं पीलुपाकवादिनः वैशेषिकाः प्रतिपादयन्ति।

तत्र द्व्यणुकनाशक्षणमारभ्य कतिभिः क्षणैः नवोत्पन्नं द्व्यणुकं रूपादिमद्भवतीति प्रसङ्गे वैशेषिकाः भिन्नभिन्नानि मतानि सम्पोषयन्ति। केषाञ्चन मते तु द्व्यणुकनाशक्षणमारभ्य नवभिः क्षणैः नवोत्पन्नं द्व्यणुकं रूपादिमद्भवति। केषाञ्चन मते तु दशक्षणैः उत्पन्नं द्व्यणुकं रूपादिमद्भवति। केचन एकादशक्षणवादिनः। तत्र क्षणप्रक्रिया तावत् शिष्यबुद्धिवैशद्यार्थमयं सिद्धान्तः नैयायिकेष्वपि समादृतः दृश्यते। यदुक्तं विश्वनाथन्यायपञ्चाननभट्टाचार्येण न्यायसिद्धान्तमुक्तावल्यां "अत्र द्व्यणुकादि स्वविनाशमारभ्य कतिभिः क्षणैः पुनरुत्पत्त्या रूपादिमद्भवतीति शिष्यबुद्धिवैशद्यार्थं क्षणप्रक्रिया[26]"

तत्र विश्वनाथः क्षणप्रक्रियायाः आरम्भे कथयति यत् "विभागजविभागानङ्गीकारे नवक्षणाः[27]"। अर्थात् विभागजविभागानभ्युपगन्तॄणां मते तु नवभिः क्षणैः उत्पन्नं द्व्यणुकं रूपादिमद्भवति। तथा च ये विभागजविभागं स्वीकुर्वन्ति तेषां मते तु दशभिः क्षणैः नवोत्पन्ने द्व्यणुके रक्तादिरूपमुत्पद्यते। विभागजविभागप्रक्रिया तु स्वातन्त्र्येण अलोचयिष्यते।

**नवक्षणप्रक्रिया**

ये तावत् विभागजविभागं नाङ्गीकुर्वन्ति तेषां मतमिदानीमालोच्यते-

अग्निसंयोगात् द्व्यणुकारम्भकपरमाणौ क्रिया जायते। ततः परमाण्वन्तरेण विभागः। तादृशद्व्यणुकारम्भकपरमाणुद्वयसमवेतविभागात् द्व्यणुकारम्भकपरमाणुद्वयस्य पूर्वसंयोगनाशः। तदुत्तरं द्व्यणुकनाशः। अयमेव द्व्यणुकनाशात्मकः प्रथमः क्षणः(१)। ततः विलक्षण-अग्निसंयोगात् परमाणुसमवेतश्यामादिपूर्वरूपाणां नाशः(२)। ततः पुनः विलक्षणतेजःसंयोगात् परमाणौ रक्तादिपाकजरूपाणामुत्पत्तिः(३)। तदुत्तरं अदृष्टादिकारणवशात् पुनः परमाणौ नवीनद्व्यणुकारम्भानुगुणा क्रिया(४)। ततः विभागः(५)। ततः पूर्वसंयोगनाशः(६)। तदुत्तरं च द्व्यणुकारम्भकसंयोगः(७)। ततः नवीनद्व्यणुकोत्पत्तिः(८)। तदुत्तरं तत्समवेतरक्तरूपादीनामुत्पत्तिः(९) इति नवक्षणाः।

अत्र आशंका जायते यत् श्यामादिपूर्वरूपनाशक्षणे एव नवीनद्व्यणुकारम्भानुगुणायाः क्रियायाः स्वीकारे तु क्षणगणनायां लाघवं स्यात्। तस्याः समाधानं विश्वनाथः इत्थं करोति यत् " अग्निसंयुक्ते परमाणौ यत् कर्म तद्विनाशमन्तरेण गुणोत्पत्तिमन्तरेण च तत्र परमाणौ क्रियान्तराभावात् कर्मवति कर्मान्तरानुत्पत्तेः[28]" अनेन ग्रन्थकारः कथयति यत् अग्निसंयुक्तपरमाणौ अग्निसंयोगात् या क्रिया तस्याः विनाशमन्तरेण अन्या क्रिया नोत्पद्यते। एवं वयं तु जानीमः यत् परमाणौ या क्रिया जायते तस्याः क्रियायाः विभागः, ततः पूर्वसंयोगनाशः तथा उत्तरदेशसंयोगः तदुत्तरक्षणे एव तस्याः क्रियायाः नाशः भवति। प्रस्तुते तु तादृशद्व्यणुकनाशक्षणे तादृशपरमाणुगतक्रियायाः विद्यमानत्वात् अन्यां क्रियां स्वीकर्तुं नैव शक्यते। ननु तर्हि तदुत्तरजायमानरक्तरूपादीनामुत्पत्तिक्षणे पूर्वक्रियायाः अविद्यमानत्वात् तदा नवीनद्व्यणुकारम्भकक्रियायाः स्वीकारेऽपि लाघवमित्यपि न शङ्कनीयम्। यतोहि रूपवद्द्रव्ये एव क्रिया जायते। तादृशरक्तरूपादीनामुत्पत्तिक्षणे तु परमाणौ रूपाभावात् तत्र द्रव्यारम्भानुगुणा क्रिया स्वीकर्तुं नैव शक्यते।

तथैव श्यामादिपूर्वरूपाणां नाशः तथा रक्ताद्युत्पत्तिः समकाले स्वीकृत्य क्षणगणनायां लाघवमित्यपि न वक्तव्यम्। यतोहि श्यामादीनां ध्वसः भवति रक्तादिपाकजरूपोत्पत्तिं प्रति कारणम्। यदुक्तं मुक्तावल्यां विश्वनाथेन "पूर्वरूपादिध्वंसस्यापि रूपान्तरे हेतुत्वात्[29]"। तथा कार्यं प्रति कारणस्य नियतपूर्ववृत्तित्वं तु सर्ववादिस्वीकृतम्। तदर्थं तयोः न समकालत्वम्।

**दशक्षणप्रक्रिया**

ये तावद्विभागजविभागमङ्गीकुर्वन्ति तेषां मते तु परमाणुविभागजनिका या क्रिया सा नहि परमाण्वाकाशविभागजनिका इत्यतः परमाणुद्वयविभागादेव परमाण्वाकाशविभागः जन्यत इति स्वीकर्तव्यः। तथा परमाणुद्वयविभागोऽपि किञ्चित्सापेक्ष्यमेव विभागं जनयेत् अर्थात् स्वोत्तरोत्पन्नकिञ्चित्सहकृतमेव विभागं जनयिष्यति। अन्यथा तु तादृशकारणाकारणविभागजनकीभूते परमाणुद्वयविभागे कार्यलक्षणस्यातिव्याप्तिः प्रसज्येत। यतोहि कणादः कर्मणः लक्षणं कथयति यत् "एकद्रव्यमगुणं संयोगविभागेष्वनपेक्षकारणमिति कर्मलक्षणम्[30]" इति।

अत्रेदं ज्ञातव्यं यत् यदा परमाणौ क्रिया जायते। तादृशक्रियातः विभागः, विभागात् पूर्वसंयोगनाशः तथा उत्तरसंयोगोत्पत्तिरिति क्रमः। विभागं प्रति यद्यपि क्रिया अनपेक्षकारणं भवति किन्तु संयोगं प्रति तु क्रिया पूर्वसंयोगनाशसापेक्षैव कारणम्। तदर्थं

न्यायसिद्धान्तमुक्तावलीकारः कथयति यत् "अनपेक्षत्वं तु स्वोत्तरोत्पन्नभावान्तरानपेक्षत्वम्[31]"। अत्र तु कर्मणः उत्तरसंयोगोत्पत्तौ भावान्तरापेक्षा नास्तीति न दोषः।

तथा च तादृशकारणमात्रविभागः द्रव्यारम्भकसंयोगनाशविशिष्टकालमपेक्ष्य कारणाकारणविभागं जनयति चेत् दशमे क्षणे उत्पन्नं द्व्यणुकं रूपादिमद्भवति। तत्र क्षणगणना इत्थं वर्त्तते।

श्यामघटे विलक्षणतेजःसंयोगात् द्व्यणुकारम्भकपरमाणुषु क्रिया जायते, तादृशक्रियातः विभागः, विभागात् पूर्वसंयोगनाशः, तादृशपूर्वसंयोगनाशात् द्व्यणुकनाशात्मकः प्रथमः क्षणः(१)। अस्मिन्नेव क्षणे विभागजविभागोऽपि जायते। ततः श्यामरूपनाश-पूर्वसंयोगनाशौ(२)। तदुत्तरक्षणे रक्तरूपोत्पत्ति-उत्तरदेशसंयोगौ(३)। ततः वह्निनोदनजन्यपरमाणुकर्मणः नाशः(४)। ततः अदृष्टवदात्मसंयोगात् पुनः द्रव्यारम्भानुगुणा क्रिया(५)। क्रियातः विभागः(६)। विभागात् पूर्वसंयोगनाशः(७)। पूर्वसंयोगनाशात् उत्तरदेशसंयोगोत्पत्तिः(८)। ततः नवीनद्व्यणुकोत्पत्तिः(९)। ततश्च तत्समवेतरक्तरूपोत्पत्तिः (१०)इति दशक्षणाः

**एकादशक्षणाः**

अथ नवीनैकदेशिनः इत्थमामनन्ति यत् कारणाकारणविभागं प्रति द्रव्यं प्रतिबन्धकं भवति। एवं तादृशप्रतिबन्धकाभावः तादृशकारणाकारणविभागं प्रति भवति कारणम्। तस्मात् परमाणुद्वयविभागः द्व्यणुकनाशद्वारा परमाण्वाकाशविभागं जनयतीत्यतः द्रव्यनाशविशिष्टं कालमपेक्ष्यैव तादृशविभागजविभागं जनयति। तस्मात् कालगणने एकः क्षणः वर्धते। तत्र क्षणगणना इत्थं भवति

श्यामघटे विलक्षणतेजःसंयोगात् द्व्यणुकारम्भकपरमाणुषु क्रिया जायते। तादृशक्रियातः विभागः। विभागात् पूर्वसंयोगनाशः ततः द्व्यणुकनाशः(१) इति द्व्यणुकनाशात्मकः प्रथमः क्षणः। ततः द्व्यणुकनाशक्षणमपेक्ष्य विभागजविभागः, श्यामादिपूर्वरूपनाशश्च(२)। ततः पूर्वसंयोगनाश-रक्तोत्पत्तिश्च(३)। ततः उत्तरदेशसंयोगः(४)। ततः वह्निनोदनजन्यपरमाणुकर्मणः नाशः(५)। तदुत्तरं अदृष्टवदात्मसंयोगात् परमाणौ द्रव्यारम्भानुगुणा क्रिया(६)। तादृशक्रियातः विभागः(७)। विभागात् पूर्वसंयोगनाशः(८)। ततः उत्तरदेशसंयोगोत्पत्तिः(९)। ततश्च द्व्यणुकोत्पत्तिः(१०)। ततः द्व्यणुकगतरक्तरूपोत्पत्तिः(११)। इति एकादशक्षणाः।

अत्र गणने किञ्चिन्न्यूनतां यद्याशङ्कते यत् यथा शब्दधारायां मध्यमशब्दः पूर्वशब्दस्य नाशकः तथा उत्तरशब्दस्य जनको भवति तद्वदेव द्व्यणुकनाशकाग्निसंयोगः एव श्यामरूपरूपस्य नाशकः तथा रक्तरूपस्य उत्पादकः भवतु। तत्रोच्यते यत् श्यामादिनिवृत्तिक्षणे तदव्यवहितपूर्वक्षणे च द्व्यणुकनाशकाग्नेः अवर्त्तमानत्वात् द्व्यणुकनाशकाग्निसंयोगः नहि श्यामादिरूपस्य नाशकः रक्तरूपस्योत्पादको वा। अपि तु विलक्षणतेजःसंयोगादेव परमाणुगतश्यामादिपूर्वरूपाणां नाशः तथा तद्विलक्षणतेजःसंयोगेनैव परमाणौ रक्तरूपस्योत्पत्तिर्भवति।

तत्र यद्युच्यते श्यामादिनाशकाग्निसंयोगेनैव रक्तरूपस्योत्पत्तिः स्वीक्रियताम्। इत्यपि न वाच्यम्। पूर्वरूपनाशकः अग्निसंयोगः एव यदि पररूपोत्पादकः स्यात् तर्हि यदि पूर्वरूपोत्पत्यनन्तरक्षणे अग्निसंयोगः विनष्टः स्यात् चेत् परमाणौ कदापि रक्तरूपस्योत्पत्तिः न स्यात्।

तदा तु परमाणौ चिरकालं नीरूपत्वप्रसङ्गः स्यात्। यदि च उत्पादकाग्निसंयोगेनैव पूर्वरूपस्य नाशः भवतीति स्वीक्रियते तदा रक्तरूपोत्पादकाग्निसंयोगः पूर्वं श्यामरूपं नाशयित्वा रक्तरूपं च उत्पाद्य विनष्टः स्यात्। तदा तादृशस्थले रक्ततरता रक्ततमता इति रूपवैविध्यं न स्यात्। यतोहि तत्र अग्निसंयोगस्तु विनष्टः अतः पाकाभावात् न हि रक्ततरत्वं न वा रक्ततमत्वम्।

**पञ्चक्षणप्रक्रिया**

एतावत्पर्यन्तं तु एकस्मिन् परमाणौ कर्म स्वीकृत्य रूपपरावृत्तिः दर्शिता। साम्प्रतमुच्यते यत् द्व्यणुकनाशकक्रिया यत्र परमाणौ जायते तद्भिन्नोत्पत्स्यमानद्व्यणुकारम्भकपरमाणौ द्व्यणुकारम्भकसंयोगनाशोत्पत्तिक्षणे उत्पत्स्यमाननवीनद्व्यणुकारम्भककर्मोत्पत्तेः स्वीकारात् तु पञ्चमादिक्षणेऽपि उत्पन्नं द्व्यणुकं रूपादिमद्भवतीति चिन्तयन्ति वैशेषिकैकदेशिनः। तत्र क्षणगणना इत्थं भवति-

अग्निसंयोगात् एकस्मिन् परमाणौ कर्म। ततः परमाण्वोः विभागः। ततः द्व्यणुकाऽसमवायिकारणपरमाणुद्वयसंयोगनाशः। तथा द्वितीये द्व्यणुकावयवे परमाणौ क्रिया च । ततः द्व्यणुकनाशः एवं परमाण्वन्तरक्रियाजन्यः परमाण्वन्तराकाशविभागः इति प्रथमः क्षणः(१)। तदुत्तरक्षणे तु विलक्षणतेजः संयोगात् परमाणुगतश्यामादिरूपाणां नाशः तथा परमाण्वन्तराकाशविभागात् आकाशेन परमाणोः पूर्वसंयोगनाशः(२)। ततः परमाणौ विलक्षणतेजःसंयोगात् रक्तरूपस्योत्पत्तिः तथा पूर्वसंयोगनाशात् द्रव्यारम्भकोत्तरदेशसंयोगः(३)। ततः नवीनद्व्यणुकोत्पत्तिः(४)। ततः तद्गतरक्तोत्पत्तिः(५)। इति पञ्चक्षणाः।

**षट्क्षणप्रक्रिया**

यदि द्व्यणुकनाशक्षणे परमाण्वन्तरे क्रिया स्वीक्रियते तदा तु षट्क्षणाः। तथाहि अग्निसंयोगात् परमाणौ कर्म। ततः परमाण्वन्तरविभागः। ततः आरम्भकसंयोगनाशः। ततः द्व्यणुकनाशः परमाण्वन्तरकर्म च इति प्रथमः क्षणः(१)। तदुत्तरं परमाणौ श्यामादिनाशः, परमाण्वन्तरकर्मजन्यः विभागः(२)। ततः रक्तोत्पत्तिः तथा परमाण्वन्तरे पूर्वसंयोगनाशश्च(३)। ततः परमाण्वन्तरसंयोगः(४)। ततः द्व्यणुकोत्पत्तिः(५)। ततः रक्तोत्पत्तिः(६)। इति षट्क्षणाः।

**सप्तक्षणप्रक्रिया**

परमाणुगतश्यामादिपूर्वरूपनाशक्षणे परमाण्वन्तरे क्रिया स्वीक्रियते चेत् सप्तमक्षणे नवोत्पन्नं द्व्यणुकं रूपादिमद्भवति। यथा अग्निसंयोगात् परमाणौ कर्म। ततः परमाण्वन्तरेण विभागः। ततः आरम्भकसंयोगनाशः। ततः द्व्यणुकनाशः इति प्रथमः क्षणः(१)। ततः विलक्षणतेजःसंयोगात् परमाणौ श्यामादिनाशः परमाण्वन्तरकर्म च(२)। ततः रक्तोत्पत्तिः, परमाण्वन्तरे कर्मजः विभागः(३)। ततः परमाण्वन्तरेण पूर्वसंयोगनाशः(४)। ततः परमाण्वन्तरसंयोगः(५)। ततः नवीनद्व्यणुकोत्पत्तिः(६)। ततः रक्तोत्पत्तिः(७)। इति सप्तक्षणाः।

**अष्टक्षणप्रक्रिया**

यदि च रक्तोत्पत्तिसमकालं परमाण्वन्तरे कर्म स्वीक्रियते तदा अष्टमे क्षणे द्व्यणुकं रूपादिमद्भवति। यथा अग्निसंयोगात् परमाणौ कर्म। ततः परमाण्वन्तरेण विभागः। ततः आरम्भकसंयोगनाशः। ततः द्व्यणुकनाशः इति प्रथमः क्षणः(१)। ततः विलक्षणतेजःसंयोगात्

श्यामादिनाशः(२)। ततः रक्तोत्पत्तिः परमाण्वन्तरे कर्म च(३)। ततः परमाण्वन्तरकर्मजः विभागः(४)। विभागात् पूर्वसंयोगनाशः(५)। ततः परमाण्वन्तरसंयोगः(६)। ततः नवीनद्व्यणुकोत्पत्तिः(७)। ततः तत्समवेतरक्तोत्पत्तिः(८) इति अष्टक्षणाः।

## विभागजविभागप्रक्रिया

"संयोगनाशको गुणो विभागः[32]" इति हि विभागलक्षणम्। वस्तुतः वयं पूर्वमेव क्षणप्रक्रियायाः वर्णनक्रमे प्रतिपादितवन्तः यत् प्रथमं क्रिया ततः विभागः ततः पूर्वसंयोगनाशः ततश्चोत्तरदेशसंयोगस्योत्पत्तिरिति क्रमः। अत्रोक्तपूर्वसंयोगनाशं प्रति कारणं भवति विभागः।

अथवा विभक्तप्रत्यय-असाधारणं कारणं विभागः। इति विभागलक्षणम्। अस्यार्थस्तु "इमौ विभक्तौ" इति प्रत्ययं प्रति असाधारणं कारणं भवति विभागः। स च विभागः त्रिविधः। यदुक्तं कारिकावल्याम्-

"........विभागोऽपि त्रिधा भवेत्।

एककर्मोद्भवस्त्वाद्यो द्वयकर्मोद्भवोऽपरः॥

विभागजस्तृतीयः स्यात् तृतीयोऽपि द्विधा भवेत्।

हेतुमात्रविभागोत्थो हेत्वहेतुविभागजः[33]"॥

एतेषु विभागजविभागत्वं भवति विभागत्वावच्छिन्नासमवायिकारणतानिरूपितविभागनिष्ठकार्यतावच्छेदकतया सिद्धजातिविशेषवत्त्वम्। तादृशविभागजविभागोऽपि पुनः द्विविधः। कारणमात्रविभागात् कारणाकारणविभागः तथा कारणाकारणविभागात् कार्याकार्यविभागः। तयोः कारणमात्रविभागजः कारणाकारणविभागः साम्प्रतमालोच्यते।

यत्र एककपाले अवयवे अदृष्टादिवशात् क्रिया(अत्रोक्तकपालपदमुपलक्षकं कपालपदेन तु परमाण्वादिनामपि अवयवानां परिग्रहः) ततः कपालद्वयविभागः, ततः तेन तु घटारम्भकासमवायिकारणस्य कपालद्वयसंयोगस्य नाशः, ततश्च घटनाशः। ततः तेनैव कपालद्वयविभागेन सकर्मणः(कर्मनाशकोत्तरसंयोगाऽभावात्) कपालस्य आकाशविभागः जन्यते। अयं च विभागः कारणमात्रविभागजः। तत्र अयं विभागजविभागः नाङ्गीक्रियेत चेत् अनित्य-अवयवात्मक-आश्रयस्य नाशात् अनित्यावयवविभ्वोः संयोगस्य नाशः सम्भवति। किन्तु द्व्यणुकस्थले तु तस्यावयवा अपि नित्याः। तस्मात् नित्यावयवविभुसंयोगस्य नाशकाभावेन तादृशस्थले नित्यत्वापत्तिः स्यात्। तथा परमाण्वाकाशसंयोगरूपस्य प्रतिबन्धकस्य सत्त्वेन तु उत्तरसंयोगाऽनुत्पत्या नित्यत्वापत्तिः उत्तरसंयोगस्यैव स्वजनककर्मनिवर्तकत्वादिति भावः। तस्मात् अयं विभागजविभागः नितरामावश्यकः। तादृशकपालाकाशविभागेन तु तयोः पूर्वसंयोगस्य नाशः जायते। ततः उत्तरदेशेन कपालस्य संयोगः ततः कपालकर्मणः नाशः।

अत्राशंका जायते यत् विभागजनिका या कपालक्रिया तयैव क्रियया तादृशकपालाकाशविभागः कथं न जायते। तत्र समाधानमित्थं भवति यत् कपालगता क्रिया घटाद्यारम्भककपालद्वयसंयोगस्य विरोधी यः कपालद्वयविभागः तज्जनिका भवति। अतः तादृश-

आरम्भकसंयोगप्रतिद्वन्द्विविभागजनकत्वेन सह अनारम्भकस्य(घटस्य अनारम्भकः यः कपालाकाशसंयोगः) विरोधी यः कपालाकाशविभागः तज्जनकतायाः विरोधात्।

यदि तादृशविरोधः नाङ्गीक्रियते तदा विकसत्कमलकुड्मलभङ्गप्रसङ्गः स्यात्। अर्थात् विकसति कमले अग्रावच्छेदेन अनारम्भकसंयोगप्रतिद्वन्द्विविभागजनककर्मणः सत्त्वात्, तेन कर्मणा मूलावच्छेदेन आरम्भकसंयोगविरोधिविभागोत्पत्या आरम्भकसंयोगनाशे सति कमलनाशप्रसङ्गः स्यादिति। तस्मात् अस्याः आपत्तेः परिहाराय तयोः विरोधः स्वीकर्त्तव्यः। अत्र अनुमानप्रयोगस्तु इत्थं क्रियते-

परमाणुसमवेतक्रिया न परमाण्वाकाशविभागजनिका परमाणुद्वयविभागजनकत्वात्, यत् यदारम्भकसंयोगप्रतिद्वन्द्विविभागजनकं तन्न अनारम्भकसंयोगप्रतिद्वन्द्विविभागजनकं भवति। यथा विकसत्कमलकुड्मलकर्म। इति सामान्यमुखव्याप्त्या परमाण्वादिकर्मविशेषे परमाण्वाकाशवृत्तिविभागजनकत्वाभाव सिद्ध्यति। तस्मात् परिशेषात् तादृशकारणाकारणविभागः कारणमात्रविभागादेव जायते इति कल्प्यते। अत्र पुनः यदि व्यभिचारशंका क्रियते यत् उक्तानुमाने परमाणुसमवेतक्रियात्मके पक्षे हेतुः(परमाणुद्वयविभागजनकत्वं) अस्तु किन्तु साध्यरूपं परमाण्वाकाशविभागाजनकत्वं मास्तु इति चेत् उच्यते यत् यदि तादृश-परमाणुसमवेतक्रियायां परमाण्वाकाशविभागजनकता स्यात् चेत् सा क्रिया परमाणुद्वयविभागजनिका न स्यात्। अन्यथा द्व्यणुकस्य अनाशापत्तिः स्यात्। यद्युच्यते यदीयमापत्तिः अस्माकमिष्टा एव। इत्यपि कथयितुं न शक्यते यतोहि उपलभ्यमानस्य त्र्यणुकादिमहावयविपर्यन्तनाशस्य अपलापप्रसङ्गः स्यात्।

यद्याशंकते यत् परमाणुद्वयविभागस्य परमाण्वाकाशविभागजनकतायां परमाणुद्वयविभागोत्तरक्षणे यदा तादृशपरमाणुद्वयसंयोगनाशः भवति तदैव परमाण्वाकाशविभागोऽपि कुतः नोत्पद्यते। इति चेत् परमाणुद्वयसंयोगप्रतिद्वन्द्विविभागवतः परमाणुद्वयस्य सति द्रव्ये(द्व्यणुकरूप) तादृशपरमाण्वाकाशविभागासम्भवात्।

एवं कारणाकारणविभागात् कार्याकार्यविभागः भवति द्वितीयः विभागजविभागः। यथा करक्रियया हस्ततरुविभागः ततः शरीरेऽपि विभक्तप्रत्ययः अर्थात् शरीरतरुविभागः।

**उपसंहारः**

यद्यपि वैशेषिकदर्शनं न्यायदर्शनञ्च समानतन्त्रमेव। तथापि पदार्थप्रमाणादयः नैके विशिष्टसिद्धान्ताः उभयोः भिद्यन्ते। तत्र सप्तपदार्थवादस्तु नैयायिकानामप्यविरुद्धा इति तु भाष्यादिवचनादेव लभ्यते। तथैव द्वित्वोत्पत्तिवादः, पाकजप्रक्रिया तथा विभागजविभागप्रक्रियाप्रभृतयः वैशेषिकानां केचन विशिष्टाः सिद्धान्ताः विद्यन्ते। येषु विचारेषु नैयायिकैः सह वैशेषिकानां सम्पूर्णं वैमत्यं प्रकटीभवति।

किन्तु एतेषु विचारेषु वयमिदं नितरां वक्तुं शक्नुमः यत् वैशेषिकाः चरमवास्तववादिनः भवन्ति। अत्र विचारितविचारेषु वैशेषिकानां सूक्ष्मव्याख्याशैली अपि गोचरीभवते। यथा अपेक्षाबुद्ध्या कथं द्वित्वादिसंख्यानामुत्पत्तिः विनाशश्च जायते इति विचारमाध्यमेन इदं

ज्ञायते यत् वाह्यिकजगतः सृष्टिविनाशक्रमे मनुष्यचेतनायाः अपि एका सूक्ष्मा भूमिका विद्यते। यथा वा द्रव्येषु रूपान्तरोत्पत्तिक्रमकथनेन ज्ञायते यत् परमाणौ विलक्षणतेजःसंयोगवशात् रूपादिपरावृत्तेः या कथा वर्णिता सा तु आधुनिकरसायणविज्ञानस्य आणविकपुनर्गठनस्येकं विस्मयकरं प्राचीनञ्च रूपं विद्यते। अथवा विभागजविभागप्रक्रिया कार्यकारणविषये तथाभूतां यौक्तिकतां निर्वहति या स्थानगतेः पारस्परिकसम्पर्कम् उन्नतेः शिखरं नयति। निरुक्तविचारेषु प्रायशः विभ्रान्तिः जायते तदर्थमेव पण्डिताः कथयन्ति यत् "यस्य न स्खलिताबुद्धिः तं वै वैशेषिकं विदुः। इति शम्।

**पादटीका**

---

1 "काणादं पाणिनीयं च सर्वशास्त्रोपकारकम्(सुप्रसिद्धमाभाणकम्)"।

2 वैशेषिकसूत्रम्(१.१.४)

3 भाषापरिच्छेदः(का.२)

4 भाषापरिच्छेदः (का.१०५)

5 भाषापरिच्छेदः (का.१०५)

6 सर्वेषामेव पदार्थानां यथायथमुक्तेषु अन्तर्भावात् सप्तैव पदार्थाः इति सिद्धम्(तर्कसंग्रहः, पृ.१२८)

7 प्रशस्तपादभाष्यभूमिका (पृ.३)

8 प्रशस्तपादभाष्यभूमिका (पृ.४)

9 प्रशस्तपादभाष्यभूमिका (पृ.४)

10 प्रशस्तपादभाष्यभूमिका (पृ.४)

11 प्रशस्तपादभाष्यभूमिका (पृ.५)

12 (सर्वदर्शनसंग्रहः, औलुक्यदर्शनम् (पृ.१०७)

13 प्रशस्तपादभाष्यम्(पृ.२६७)

14 प्रशस्तपादभाष्यम् (पृ.२३६)

15 प्रशस्तपादभाष्यम् (पृ.२३९)

16 भाषापरिच्छेदः(का.१०७)

17 न्यायसिद्धान्तमुक्तावली(पृ.४००)

18 न्यायसिद्धान्तमुक्तावली (पृ.४०१)

19 प्रशस्तपादभाष्यम्(पृ.२७२-२७४)

20 न्यायसिद्धान्तमुक्तावली (पृ.४०२)

21 न्यायसिद्धान्तमुक्तावली (पृ.४०२)

22 वैशेषिकसूत्रम्(७.१.६)

23 न्यायसूत्रम्(३.२.४८ (झा, २०१३))

24 तर्कसंग्रहः(पृ.४९)

25 प्रशस्तपादभाष्यम्(पृ.२५७-२६२)

26 न्यायसिद्धान्तमुक्तावली(पृ.३९२)

27 न्यायसिद्धान्तमुक्तावली (पृ.३९२)

28 न्यायसिद्धान्तमुक्तावली (पृ.३९४)

29 न्यायसिद्धान्तमुक्तावली (पृ.३९४)

30 वैशेषिकसूत्रम्(१.१.१७)

[31] न्यायसिद्धान्तमुक्तावली(पृ.३९३)

[32] तर्कसंग्रहः(पृ.५५)

[33] भाषापरिच्छेदः(का.११९-१२०)

## सन्दर्भग्रन्थसूची


1. आचार्यढुण्ढिराज-शास्त्री. (१९६९). *विद्वच्चूडामणिश्रीशङ्करमिश्रविरचितः वैशेषिकसूत्रोपस्कारः*. वाराणसी: चौखम्बा संस्कृत सीरीज आफिस.

2. कृष्णवल्लभाचार्यः, प. (२०२१). *श्रीविश्वनाथन्यायपञ्चाननप्रणीता न्यायसिद्धान्तमुक्तावली*. वाराणसी: चौखम्भा संस्कृत संस्थान.

3. कृष्णवल्लभाचार्यः, प. (२०२२). *श्रीमदन्नम्भट्टविरचितः तर्कसंग्रहः*. वाराणसी: चौखम्बा संस्कृत सीरीज आफिस.

4. झा, ड. म. (२०१३). *महर्षिगौतमप्रणीत-न्यायसूत्रम्*. वाराणसी: चौखम्बा संस्कृत सीरीज आफिस.

5. झा, द. (१९७७). *प्रशस्तपादाचार्यप्रणीतं प्रशस्तपादभाष्यम्*. वाराणसी: सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः.

6. तर्काचार्यः, क. (ब.१३३२). *वैशेषिकदर्शने प्रशस्तपादभाष्यम्*. कलिकाता: संस्कृतसाहित्यपरिषद्.

7. भट्टाचार्यः, आ. (ब.१४२२). *विश्वनाथन्यायपञ्चाननविरचितः भाषापरिच्छेदः*. कलिकाता: विजयायन.

8. वासुदेव-शास्त्री. (१९२४). *श्रीमत्सायणमाधवाचार्यप्रणीतः सर्वदर्शनसंग्रहः*. मुम्बई: निर्णयसागरमुद्रणालयः.

9. शास्त्री, प. ह. (२०१८). *श्रीविश्वनाथन्यायपञ्चाननभट्टाचार्यविरचिता न्यायसिद्धान्तमुक्तावली*. वाराणसी: चौखम्भा प्रकाशन.